# Shri Rajagopala Stava

# શ્રીરાજગોપાલસ્તવઃ

## Document Information

Text title : Shri Rajagopala Stava 05 11

File name : rAjagopAlastavaH.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-11

Latest update : October 9, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરાજગોપાલસ્તવઃ

શ્રીરાજગોપાલમુખારવિન્દં
    વન્દામહે મોહનમિન્દિરાયાઃ ।
યદીયસન્દર્શનનન્દિતાનાં
    ન મુક્તિલાભોદિતમોદવાઞ્છા ॥ ૧॥

વાઞ્છાધિકાનેકપુમર્થદાન-
    દક્ષોત્પલોલ્લાસિકટાક્ષવીક્ષમ્ ।
શ્રીરાજગોપાલમુખામૃતાંશું
    પશ્યેમ શશ્વદ્ભવતાપનુત્યૈ ॥ ૨॥

નુતં શ્રુતીનાં તતિભિસ્તતાભિ-
    સ્તથાનવિચ્છિન્નમિયત્તયાપિ ।
શ્રીરાજગોપાલ તવાનુભાવ-
    મજ્ઞઃ કથં સ્તોતુમલં ભવામિ ॥ ૩॥

ભવન્તિ લોકાઃ સકલા વિચિત્રા-
    સ્ત્વદેકદેશાશ્ચિદચિદ્વિશિષ્ટ ।
શ્રીરાજગોપાલ તવ સ્વરૂપં
    તતો વિચિત્ર પ્રવદન્તિ સન્તઃ ॥ ૪॥

સન્તસ્તુવન્તીશ તવાનુભાવં
    અન્ત(ર્મુ)સ્સુખાઃ સન્તતયુક્તચિત્તાઃ ।
તાપત્રયાર્તો વિષયાનુવૃત્ત-
    ચિત્તઃ કથં સ્તોતુમહં પ્રવૃત્તઃ ॥ ૫॥

પ્રવૃત્ત એવ સ્વયમેવ વક્તું
    પાદામ્બુજદ્વન્દ્વસમાશ્રિતાનામ્ ।
વિસ્રમ્ભસમ્પદ્વિરહાદિહાહં
    ત્વાં રક્ષ રક્ષેતિ કદર્થયામિ ॥ ૬॥

missing in the manuscript

તદર્થતત્તત્પુરુષાર્થદાન-
    ગુણપ્રદાનેન હિતાયસિ ત્વમ્ ॥ ૭॥

ત્વમેક એવાસિ પરં નિધાન-
    મધ્યક્ષિતં ભક્તિભરાજિતાક્ષૈઃ ।
વિશ્વેશ શશ્વદ્બહુશઃ સ્મૃતીનાં
    વિશ્રાન્તિભૂમિશ્ચ તથા શ્રુતીનામ્ ॥ ૮॥

શ્રુતિસ્તુ સત્ત્વોત્તરશાસ્ત્રમાસીત્
    ભવાંશ્ચ સત્યૈકગુણઃ પુરાણઃ ।
એવં સ્થિતે ત્વત્ર કથં નુતઃ સ્યા
    આકર્ષણં ચૈવ બલાદ્ઘટેદ ॥ ૧॥

તત્ત્વપ્રકાશો વિશયં શ્રુતીનાં
    વિષ્વઙ્મુખીનામબહુશ્રુતેભ્યઃ ।
“વેદૈશ્ચ સર્વૈરહમેવ વેદ્યઃ”
    ઇત્યેવકારેણ નિરાચકર્થ ॥ ૧૦॥

ચકર્થ ગીતાં યદિ વત્સલ ત્વં
    ત્વમેવ વિષ્ણુર્યદિ કૃષ્ણરૂપઃ ।
ગીતા ચ માનં યદિ તત્ત્વસિદ્ધૌ
    કુતોઽન્યતોઽસ્મત્પદવાચ્યતા સ્યાત્ ॥ ૧૧॥

સ્યાદ્ધિ પ્રમાણં ભગવન્નચાલ્યં
    નામ્નાં સહસ્રં બહુભિઃ કિમન્યૈઃ ।
જગત્પ્રભું દેવમિતિ પ્રકૃત્ય
    ત્વમેવમિત્યસ્ય કૃતોત્તરત્વાત્ ॥ ૧૨॥

દત્તોત્તરો વિષ્ણુપુરાણરત્ન-
    ગતૈર્વચોભિર્વિચિકિત્સિતાંશઃ ।
વિષ્ણોઃ સકાશાદિતિ યાન્યવોચં
    સામાન્યતઃ પ્રશ્નમુપર્યસક્તમ્ ॥ ૧૩॥

અસક્તચિત્તૈઃ પરતત્ત્વવિદ્યા-
    નિષ્ઠૈરનુષ્ઠાનપરૈરનેકૈઃ ।

નાનાદિશાસ્થૈઃ પરતત્ત્વરૂપં
    વ્યચાર્યહો વિષ્ણુપુરાણમાનૈઃ ॥ ૧૪॥

માનેષુ યા યત્પ્રતિકૂલિતાર્થા
    સા ન સ્મૃતિઃ શસ્યત ઇત્યુદીર્ણા ।
મનુસ્મૃતિઃ કર્મસમર્ચ્યમાહ
    નારાયણં ત્વાં પુરુષં પરં ચ ॥ ૧૫॥

ચકાસ્તિ યત્સૂત્રસમૂહ એવં
    સર્વાત્મન્ના તત્ત્વબુભુત્સુસેવ્યઃ ।
યોઽસૌ મહાભારતવેદમાદૌ
    નારાયણસ્યૈવ કથાં જગાદ ॥ ૧૬॥

દયાલુનાલોડ્ય સમસ્તશાસ્ત્રં
    નારાયણધ્યેયતમત્વમુક્ત્વા ।
ભુજં સમૃદ્ધૃત્ય મુનીન્દ્રવૃન્દે
    ત્રિઃ સત્યમિત્યાહ સમાનમેયે ॥ ૧૭॥

યે ત્વન્યદેવાભ્યધિકત્વમૂચુઃ
    કેચિત્ પ્રબન્ધાઃ પ્રતિ કલ્પ માન્યાઃ ।
રજસ્તમઃસ્પૃષ્ટચતુર્મુખેન
    સમીરિતા ઇત્યવધીરિતાસ્તે ॥ ૧૮॥

તેનેહ માનાનિ વિચાર્ય સમ્યક્
    પ્રામાણિકાઃ સત્ત્વગુણોત્તરાસ્ત્વામ્ ।
શ્રીરાજગોપાલ પરં પુમાંસં
    વદન્તિ સન્તો જગદેકહેતુમ્ ॥ ૧૯॥

હેતુત્વમન્યત્ર કથં ઘટેત
    સંવર્તસિન્ધૌ સકલે વિલીને ।
કૃત્સ્નૈઃ સિસૃક્ષાકૃતયોગનિદ્રે
    ત્વયિ પ્રમાણૈરભિધીયમાને ॥ ૨૦॥

નેતસ્ત્વદીયાખિલકારણત્વે-
    નાતઃ પરં માનમવેક્ષણીયમ્ ।
યન્નારશબ્દાભિહિતેષુ મુખ્ય-
    સ્ત્વન્નાભિપદ્માદુદ્ભૂત સ્વયમ્ભૂઃ ॥ ૨૧॥

ભૂદેવગુપ્ત્યૈ યદવાતરસ્ત્વં
    સઞ્જાયમાનો બહુધાદિદેવ ।
તેનૈવ કેચિત્તવ ભૂમ્ન્યસીમ્નિ
    સિદ્ધાન્તતામાનશિરે સશઙ્કાઃ ॥ ૨૨॥

શઙ્કા કૃતા વા યદજો ભવન્ન-
    પ્યાત્મેચ્છયૈવાવતરામિ જન્મ ।
કર્માવિદિત્યં મમ વેત્તુરેવ
    જન્માપિ ન સ્યાદિતિ ગાયસિ ત્વમ્ ॥ ૨૩॥

ત્વદીયકલ્યાણગુણાકરત્વં
    શ્રુતં રમેશા missing ચલન્તિ કેચિત્ ।
કચિત્ missing in the manuscript
    missing in the manuscript ॥ ૨૪॥

    પ્રત્યક્ષમુખ્યાખિલમાનવેદ્યમ્ ।
કૃત્સ્નં ચ મિથ્યેત્યભિધાય મેયં
    યે નિર્વિશેષં ચ વદન્તિ વેધમ્ ॥ ૨૫॥

વેદ્યં સદક્ષૈરપિ નિર્વિકલ્પ
    ઇદન્તયાસક્તિમુપૈતિ લિઙ્ગમ્ ।
વ્યાપ્તિં પુરસ્કૃત્ય તથોપમાનં
    સામ્યં ચ મેયં ગમયત્યદૃષ્ટમ્ ॥ ૨૬॥

દૃષ્ટા હિ શબ્દસ્ય ચ શક્તિધર્મ-
    પુરસ્કૃતિર્લક્ષણયા પદાનિ ।
સર્વાણ્યપિ સ્વાર્થવિબોધકાની-
    ત્યુદીરણં હૈ પરિહાસયોગ્યમ્ ॥ ૨૭॥

યોગ્યે ચ શબ્દે પરિકલ્પ્ય શક્તિ-
    મન્યત્ર સર્વત્ર પદે પદજ્ઞાઃ ।
સમ્બન્ધયુક્તેઽનુપપત્તિમેવ
    દૃષ્ટા શ્રયન્તીશ્વરલક્ષણં ચ ॥ ૨૮॥

ચઞ્ચત્પ્રકૃત્યર્થમુપર્યુદઞ્ચત્
    સ્વપ્રત્યયાર્થત્વવિશેષવાચામ્ ।

ચયઃ પદાનાં નિજતત્તદર્થ-
ભેદોદિતાકાઙ્ક્ષક્રમન્વિયાય ॥ ૨૯॥

યાત્યેવમર્થાનુસૃતિં વિહાય
સમ્બન્ધસિદ્ધાવપિ લક્ષણાં ચ ।
અલક્ષિતે લક્ષણયાભિધેયે
પર્યાયભાવં વદ વાક્યજાતમ્ ॥ ૩૦॥

તન્મુચ્યતાં વાચકતાપ્રકાર-
વિચારણા બ્રહ્મ સલક્ષણં ચ ।
જન્માદિના કિં નુ વિશેષ્યમિષ્ટ-
મુતોપલક્ષ્યં સગુણં દ્વિધાપિ ॥ ૩૧॥

પિનદ્ધમેકેન વિશેષણેન
ગૃહાદિ કાકાદ્યુપલક્ષણીયમ્ ।
અતો બૃહત્ત્વાદિવિશિષ્ટમેવ
બ્રહ્મોપલક્ષ્યં ન તુ નિર્વિશેષમ્ ॥ ૩૨॥

વિશેષમાલમ્બ્ય મનોઽપ્યુપાસ્તૌ
પ્રવર્તતે ધ્યેયગતં હિ કઞ્ચિત્ ।
તથૈવ વિદ્યાશ્ચ પરા ગૃણન્તિ
તતો ભવદ્ભવ્યગુણા ન મિથ્યા ॥ ૩૩॥

મિથ્યાગુણોપાસનતો યદિ સ્યાત્
ઉપાસનાનિર્વચનીયતત્ત્વે ।
હૈ શુક્તિરુપ્યાધિગમાદ્ભવેયુઃ
સમાધિભાજો ભુવિ સર્વ એવ ॥ ૩૪॥

એવં ભગો શ્રેષ્ઠગુણાનુબદ્ધં
ત્વાં નિર્ગુણં હેયગુણૈરશૂન્યમ્ ।
શ્રુત્યાં વદન્ત્યાં ત્રિતયાવિરોધાત્
સામાન્યતો યોઽપિ વિશેષસક્તઃ ॥ ૩૫॥

સક્તો ગુણૈર્હેયગુણૈરસક્તો
ભવાન્ રમેશોભયલિઙ્ગયુક્તઃ ।
અદ્રેશ્યમવ્યક્તમિતિ પ્રવાદ
પ્રત્યક્ષિતાર્થાતિવિલક્ષણત્વાત્ ॥ ૩૬॥

ત્વમેવ જીવં પ્રલપન્ત્યભેદ-
 વાદાદવિદ્યાન્ધમુપાધિભિન્નમ્ ।
પ્રકાશમાત્રસ્ય સતસ્તિરોધિઃ
 સ્વરૂપનાશાદિભયાન્નિરસ્યઃ ॥ ૩૭॥

સ્યાદપ્યવચ્છિન્નમુપાધિપક્ષે
 બ્રહ્માનવચ્છિન્નમતો દ્વયં ચ ।
અયુક્તમેતચ્ચિદચિચ્છરીર-
 સ્ત્વમેક એવાસિ વિભૂતિમાંશ્ચ ॥ ૩૮॥

ચમત્કૃતિઃ સા કિલ દર્શનીયા
 યન્માયિનોઽસત્યગિરૈવ સર્વમ્ ।
સમર્થયન્તે વ્યવહારસત્યં
 હૈ શુક્તિરૂપ્યં ચ તતઃ કિમાસીત્ ॥ ૩૯॥

આસીરહેયો ભગવંસ્ત્વમુક્તઃ
 પરાશરાદ્યૈઃ પરતત્ત્વવિદ્ભિઃ ।
"સમસ્તકલ્યાણગુણાત્મકોઽસૌ"
 ઇત્યાદિભિર્વાક્યશતૈર્ગુણાઢ્યઃ ॥ ૪૦॥

આઢ્યો વિભૂત્યા પરયા ગુણૈશ્ચ
 લક્ષ્મીમહીભ્યામભિસેવ્યમાનઃ ।
પાદારવિન્દાનતસૂરિવૃન્દ
 ચક્રાદિદિવ્યાયુધયૂથધારી ॥ ૪૧॥

રિરક્ષિષાસક્તમનોમનોજ્ઞ-
 વપુઃ કિરીટાદિમનૂપુરાન્તૈઃ ।
વિભૂષણૈર્ભૂષિત ઈશ શેષં
 વૈકુણ્ઠલોકે ત્વમલઙ્કરોષિ ॥ ૪૨॥

કરોષિ દુગ્ધામ્બુનિધૌ રમેશ
 શેષે શયાલુઃ સનકાદિસેવ્યઃ ।
તાપત્રયોપપ્લવતપ્તચિત્ત-
 ચતુર્મુખાભ્યર્થનયાવતારાન્ ॥ ૪૩॥

અવાતરસ્ત્વં પ્રથમં વિધીશ-
    મધ્યે સ્વયં વિષ્ણુસમાહ .. ।
॥ missing in the manuscript
... તનોષિ રક્ષામ્ ॥ ૪૪॥

રક્ષન્ હિ વેદાપહૃતેર્વિરિઞ્ચિ
    ભવાન્ મહાપાતકતસ્ત્રિણેત્રમ્ ।
પ્રદ્યુમ્નસઙ્કર્ષણરૂપતસ્તૌ
    કૃત્યેષ્વધિષ્ઠાય કરોતિ શક્તૌ ॥ ૪૫॥

શક્તિઃ કુતઃ સ્યાત્ ત્રિદિવાધિરાજ્યે
    પુરન્દરસ્ય ત્વમુપેન્દ્રરૂપઃ ।
સાચિવ્યકારી યદિ તસ્ય નાસિ
    નાસીરરક્ષાકરણૈકદક્ષઃ ॥ ૪૬॥

ક્ષયાર્ણવે દેવ ચરાચરાણિ
    સર્વાણિ નાપિ પ્રણિધાય ધૃત્વા ।
દંષ્ટ્રૈકદેશેન મનોજ્ઞમીનો
    મનોસ્તનોષિ સ્મ હિતોપદેશમ્ ॥ ૪૭॥

શં સાધુબન્ધો મથને પયોધેઃ
    સુધાર્થમભ્યર્થનયા સુરાણામ્ ।
પૃષ્ઠપ્રદેશોદ્ધૃતમન્થશૈલઃ
    કૂર્મસ્વરૂપઃ સમધાઃ સુધાજમ્ ॥ ૪૮॥

જન્તૂનિમગ્નાન પ્રલયામ્બુરાશૌ
    વિલોક્ય લોકેશમહાવરાહઃ ।
ભૂત્વા .. .. ભૂરિદયોદ્ધાર (દયાપૂરિત ઉદ્ધાર)
    ધરાં સ્વદંષ્ટ્રામુખતઃ સખેલમ્ ॥ ૪૯॥

ખેલગ્નવલ્ગત્સટમટ્ટહાસ-
    સ્ફુટદ્વિષન્નિષ્ઠુરધૃષ્ટભાવઃ ।
સૈંહ વ્યધાત્ સંહનનં મહત્તે
    પ્રહ્લાદમન્વર્થસમાહ્વયં હિ ॥ ૫૦॥

હિતં વિતન્વન્ દ્વિષતે હિ યાચ્ઞાં
    વિધાય વેધઃકરધૌતપાદઃ ।

પાદામ્બુજસ્યન્દિમરન્દધારા-
    શઙ્કાદગઙ્ગામકરોસ્ત્રિલોક્યૈ ॥ ૫૧॥

લોકક્ષયોદ્યુક્ત લિપ્તકૃત્સ્ન-
    ક્ષત્રક્ષયાય સૃજો જકૃત્યામ્ ।
પરશ્વથાગ્નૌ રુધિરહ્રદે ચ
    કૃતાહુતિઃ કલ્પિતતર્પણસ્ત્વમ્ ॥ ૫૨॥

ત્વમીશવંશં મિહિરસ્ય સીતા-
    મનો મુનીનામુટજાટવિં ચ ।
ક્રમેણ સુગ્રીવવિભીષણર્દ્ધિ-
    મલઞ્ચકર્થાદિકવેર્વચાંસિ ॥ ૫૩॥

સિતાયુતક્ષીરતુલા લલાસ
    હલાસ્ત્રહેલાનવમઞ્જરીભિઃ ।
લીલાલતા સા કિલ માધવસ્ય
    સમેધિતા ગોપવિલાસિનીભિઃ ॥ ૫૪॥

ભિન્નાઞ્જનશ્યામતનું મનોજ્ઞં
    સશઙ્ખચક્રાગ્રચતુર્ભુજાઢ્યમ્મ્ ।
પીતામ્બરં કૌસ્તુભભૂષિતં ત્વાં
    તુષ્ટાવ દેવક્યવલોક્ય સૂનુમ્ ॥ ૫૫॥

સ્તુવન્નમન્ સ્વં વસુદેવ આત્મ-
    જાતં પરં ત્વામભિવીક્ષ્ય સાક્ષાત્ ।
સંસારનિસ્તારમયાચમાનઃ
    કંસાદહિંસાં તવ યાચતે સ્મ ॥ ૫૬॥

સ્મરન્તિ સન્તોઽપ્યનઘં ભવન્તં
    સ્વસ્રીયમાત્માન્તકરં નિશમ્ય ।
કંસો નિહન્તું ચકમેઽનઘં ત્વ-
    મઘાતયશ્ચિત્રમિદં સ્વસારમ્ ॥ ૫૭॥

સારં સ્વકં દર્શયિતું યદીહ
    હન્તું દ્વિષન્તં યદિ વાભિલાષઃ ।
પીતસ્તનાયાસ્તવ પૂતનાયા
    વયોવિધેર્નાથ પરં વિરુદ્ધમ્ ॥ ૫૮॥

વિરુદ્ધચિત્તઃ શકટાસુરસ્તે
    પાદારવિન્દદ્વયભઙ્ગિમિમાર ।
નિરન્તરપ્રીતિકૃતો મુકુન્દ-
    પદારવિન્દં મૃતિમૃગ્યમાસીત્ ॥ ૫૯॥

આસીત્તૃણાવર્તસમુત્થચક્ર-
    વાત્યાસમુત્થાપિતમસ્ય વીક્ષ્ય ।
કણ્ઠં ગૃહીત્વાથ નિહત્ય મહ્યાં
    શિશું શયાલું જનની સશઙ્કા ॥ ૬૦॥

શઙ્કા યશોદાહૃદયોદિતાપિ
    સા જૃમ્ભમાણે વદનારવિન્દે ।
પ્રદર્શ્ય વિશ્વં વિશદ વિચિત્રં
    ન ચિત્રમત્રેતિ નિરાકૃતાભૂત્ ॥ ૬૧॥

ભૂમૌ મમાઙ્ઘ્રિદ્વિતયાશ્રિતાનાં
    સ્વકર્મનાશેન ન કર્મબન્ધઃ ।
ન કર્મનૈરર્થ્યમપિ પ્રસજ્યે-
    તેતિ સ્વયં તાશપાશબદ્ધઃ ॥ ૬૨॥

બદ્ધસ્ત્વમસ્તાશ્રિતકર્મબન્ધ
    હૈયઙ્ગવીનાપહૃતિં વિધાય ।
શાપાદદાઃ મોચનમર્જુનાભ્યા-
    મુલૂખલાકર્ષણલીલયૈવ ॥ ૬૩॥

missing in the manuscript
કથં તથાપ્યર્જુનનાશહેતુ-
    ભૂતાં વ્યતાનીરતિબાલલીલામ્ ॥ ૬૪॥

લાસ્યં સુરસ્યં નવનીતમોષ-
    રોષોપશાન્ત્યૈ વ્રજસુન્દરીણામ્ ।
પુરઃ કરસ્થે નવનીત ભાણ્ડે
    વ્યધા યથા તા હૃષિતા ભવેયુઃ ॥ ૬૫॥

યુતોઽપ્રજેનેશ સમગ્રબાલ-
    લીલારસૌઘાન રસિકોપસેવ્યાન્ ।

દેવક્યલભ્યાન્ કલભપ્રગલ્ભ
    સદા યશોદાસુલભાન્ વ્યતાનીઃ ॥ ૬૬॥

નીતં ત્વયા દુગ્ધમુખં યદૃદ્ધિં
    નન્દવ્રજે નન્દિતગોકુલેન ।
શ્રીરાજગોપાલ સબાલલીલં
    સ્તેયેન તત્સર્વમહાર્યનૂનમ્ ॥ ૬૭॥

નૂનં મિથો ગોપવધૂમનોઽપિ
    મનોહરત્વં નવનીતચોરઃ ।
મોહાજ્જવેનાપજહર્થ તેન
    નાતાનિ તાભિસ્ત્વયિ રોષલેશઃ ॥ ૬૮॥

શસ્તે ત્વયા વત્સલ વત્સદૈત્યે
    ત્વત્પાલિતાન્ બાલ વિલાસકાલે ।
વત્સાન્ વિશઙ્કે ત્રિદશાસ્ત્વદીયા-
    વતારચારિત્રસરૂપરૂપાન્ ॥ ૬૯॥

પાતું ગવાં વૃન્દમથ પ્રવૃત્તો
    વૃન્દાવનાન્તે યદુનન્દન ત્વમ્ ।
વેણુક્વણેનેવ વિધાય તૃપ્તિં
    નિવર્તયામાસિથ ચિત્રચર્ય ॥ ૭૦॥

યદા ભવાન્ ભાવુકવેણુનાદા-
    દુન્માદયામાસ તદા ત્વદાદિ ।
જડાજડાત્મત્વવિભાગશૂન્ય-
    મહો બભૂવાખિલમન્યદેવ ॥ ૭૧॥

દેવેશ તાદૃઙ્મુરલીનિનાદ-
    સોન્માદચિત્તા વ્રજસુન્દરાઙ્ગ્યઃ ।
ત્યક્તાન્યયોગાસ્ત્વયિ સાનુરાગા
    બભૂ વુરિત્યત્ર વિચિત્રતા કા ॥ ૭૨॥

કાન્તસ્મિતાલઙ્કૃતવક્ત્રચન્દ્ર-
    સઙ્ગક્વણદ્વેણુકનત્કરાબ્જમ્ ।
વ્યત્યસ્તપાદામ્બુજમમ્બુજાક્ષ
    ભવદ્વપુર્ભક્તજનોપજીવ્યમ્ ॥ ૭૩॥

વ્યક્તોક્તિભઙ્ગી મુરલી સખી તે
ઘોષાઙ્ગનાનાં કૃતચિત્તમોહા ।
શૃઙ્ગારલીલારસચારુરાસ-
વિલાસસાચિવ્યકરી કિલાસીત્ ॥ ૭૪॥

સીદત્સુ સર્વેષુ વિષાગ્નિમિશ્ર
કૃષ્ણાપયઃપાનવશાત્ કિશોરઃ ।
ભવાનભીઃ કાલિયમસ્તરત્ન-
રુચ્યર્ચિતાઙ્ઘ્રિઃ પ્રણનર્ત ચિત્રમ્ ॥ ૭૫॥

ત્રાતસ્ત્વસૌ કેશવશેષિતોઽપિ
શેષત્વસમ્પદ્ભવનં બભૂવ ।
નૃત્યત્વદીયાઙ્ઘ્રિયુગાઙ્કનેન
નિત્યપ્રસક્તસ્વફણાસહસ્રઃ ॥ ૭૬॥

સહસ્રસઙ્ખ્યૈઃ સપયોભિરહ્નિ
સહ સ્વચિત્તાનુવિધાયિકૃત્યૈઃ ।
ગોપાલબાલૈર્યમુનાવનાન્તે
તદીયદારૈર્વ્યહરદ્વ્રજન્યામ્ ॥ ૭૭॥

ન્યાય્યં કિમેતદ્વ્રજકન્યકાસુ
સરોવિહારૈકપરાસુ રાજન્ ।
ગૃહીતતીરસ્થદુકૂલક સ્મ
કુન્દસ્થિતઃ પ્રાર્થયસેઽઞ્જલિં તાઃ ॥ ૭૮॥

તાભિઃ કૃતશ્ચૈકકરાઞ્જલિસ્ત્વં
કાર્યાન્તરાસક્તકરાન્તરાભિઃ ।
અકાર્યમેવાકથયો વિધિજ્ઞ
વિરોધગન્ધોઽત્ર કથં વિધીનામ્ ॥ ૭૯॥

નાન્યચ્ચરિત્રં ભવતોઽતિચિત્રં
યત્સત્પવર્ષોઽપિ ચ સપ્તવર્ષાત્ ।
દીનાનિ દીનાનિ ગવાં કુલાનિ
લીલોદ્ધૃતાદ્રિઃ સમપાલયસ્ત્વમ્ ॥ ૮૦॥

ત્વદીયસઙ્કલ્પલનેન દેવ

રક્ષા યદિ સ્થાવરજઙ્ગમાનામ્ ।
મહીધ્રમુદ્ધૃત્ય ભુજેન વર્ષાત્
ગોગોપરક્ષા રચિતા નુ ચિત્રા ॥ ૮૧॥

ત્રાતું ત્વયિ સ્વાનચિરાદરાતીન્
નિરાચિકીર્ષત્યપિ કંસકર્ણે ।
જજાપ વૃન્દાવનવાસિનં ત્વાં
ત્વરાન્વિતસ્તસ્ય વધે સુરર્ષિઃ ॥ ૮૨॥

સુરર્ષિવૃન્દૈરપિ ચિન્ત્યમાનં
પાદારવિન્દં તવ નન્દસૂનો ।
બ્રહ્મા । । । । । ।
સ્થિરત્રસાનાં સુલભં બભૂવ ॥ ૮૩॥

વધાય કંસસ્ય રથાધિરૂઢે
વિહાય ગોપીં મધુરાં યથાસૌ ।
। । । । । ।
। । । નિરણાયિ ભોગઃ ॥ ૮૪॥

ગચ્છંશ્ચ વીથ્યાં મથુરાવધૂભિઃ
કુબ્જાઙ્ગવૈરૂપ્યનિરાકૃતિજ્ઞઃ ।
બાલઃ કિલાયં વસુદેવસૂ નુ-
રિતિ સ્મરસ્મેરમુદીક્ષ્યસે સ્મ ॥ ૮૫॥

સ્મૃતત્વદીયાખિલબાલલીલૌ
જગત્પિતરત્વં પિતરૌ વિમુચ્ય ।
બન્ધાદ્વ્યધાઃ કંસકૃતા સ્વરૂપ-
સાક્ષાત્કૃતિપ્રીતિયુતૌ નિતાન્તમ્ ॥ ૮૬॥

નિતાન્તતાન્તાં શિશુપાલપાપ-
પ્રસક્તિવાર્તાશ્રવણેન કૃષ્ણ ।
ત્વાં રુક્મિણીં રુક્મસમાનશોભા-
માહૃત્ય હૃદ્યામકૃથાઃ કૃતાર્થામ્ ॥ ૮૭॥

અર્થાદમર્ત્યાધિપતેરમિત્રાન્
સંહર્તુમુદ્યુક્તમના મનાક્ ત્વમ્ ।
સત્યાનુરોધાદકરોન્મુરારે

પુરં સુરાવાસમપારિજાતમ્ ॥ ૮૮॥

તં ત્વાં ભજન્તઃ શરણં શરણ્યં
રણેષુ પાર્થાત્ર ભવત્ કૃતાર્થાઃ ।
પાઞ્ચાલપુત્રીપરિભૂતિધૂતિ-
પ્રવીણનામસ્મરણપ્રભાવા ॥ ૮૯॥

ભાવાહિતત્વન્મહિમપ્રરોહા
ભર્તુઃ શુકવ્યાસપરાશરાદ્યાઃ ।
શ્રીરાજગોપાલ તવાખિલાસુ
લીલાસુ કૂલઙ્કુષવાગ્વિલાસાઃ ॥ ૯૦॥

વિલાસવત્યંસકસવ્યહસ્તં
સ્મેરાનનાબ્જં કમનીયકાયમ્ ।
કરાન્તરેણાદૃતકેલિયષ્ટિ-
મભીષ્ટદં ત્વાં શરણં ભજેયમ્ ॥ ૯૧॥

જયં યદીદં કલિકાલખેલદ્
દુર્વૃત્તજાતં તવ કલ્કિમૂર્ત્યા
અદ્યૈવ સદ્યાચનયાનવદ્ય
તથા યતેથાઃ સ્વજનાવનાય ॥ ૯૨॥

યદેવ દેવાત્ર પરત્ર ચાપિ
હિતં સતાં ચાનુમતં હિતજ્ઞ ।
તન્મે તવાઙ્ઘ્રી શરણં ગતાય
રમ્યં રમાધીશ વિધેહિ સમ્યક્ ॥ ૯૩॥

સમીચ્યસમ્યક્ત્વધિયા વિમુગ્ધો
સમીચિ સમ્યક્ત્વધિયા ચ નાથ ।
કથં ત્વહં મે હિતમેતદેવ ।
તદેવ દેહીત્યપિ યાચિતાહે ॥ ૯૪॥

હે દેવ ભોગીશખગેશમુખ્યૈ-
ર્દિવ્યૈર્દિવારાત્રવિભાગશૂન્યમ્ ।
સંસેવ્યમાનં તવ પાદપદ્મ-
યુગં કદાહં કરવાણિ સાક્ષાત્ ॥ ૯૫॥

ક્ષાન્તિઃ ક્ષમાનાથ મદીયદોષ-
    લાભાદલભ્યાદખિલેઽપિ લોકે ।
અતીવ સૌહિત્યમુપેત્ય મુક્તિં
    બદ્ધાત્ સ્વતન્ત્રાન્મમ સંવિધત્તામ્ ॥ ૯૬॥

તામેવ દેવીં શરણં પ્રપદ્યે
    દધામ હેતું મહતીં ત્વદીયામ્ ।
યાસીત્ સ્વયં સંસૃતિચક્રવાત્યા-
    ભ્રમાતિદુઃખ્યજ્જનજીવનાય ॥ ૯૭॥

યત્સત્સુ વાત્સલ્યમિતિ પ્રસિદ્ધં
    ત્વદીયકલ્યાણગુણેષુ રત્નમ્ ।
તદેવ પૂર્વોત્તરદોષરાશી
    ઉપેક્ષ્ય રક્ષેદિતિ નિશ્ચયો મે ॥ ૯૮॥

મેધા દૃઢા માધવ તે પરત્વેઽ-
    પ્યપાયતાયાં યદુપેયતાયામ્ ।
પરીક્ષ્ય રક્ષ ત્રિતયં તદેતત્
    સમગ્રમાગોઽન્યદુપેક્ષણાર્હમ્ ॥ ૯૯॥

અર્હદ્ભિરઙ્ઘ્રોર્ભવતોઽર્પિતં માં
    સહાસ્મદીયેન દયાર્દ્રચિત્ત ।
શ્રીરાજગોપાલ તથા વિધેહિ
    યથા ભવેયં ભૃતકિઙ્કરશ્રીઃ ॥ ૧૦૦॥

ઇતિ શ્રીરાજગોપાલસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Rajesh Thyagarajan

*Shri Rajagopala Stava*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*